ॐ

ॐ

# श्रीदिव्यमंगळध्यानं

śrīdivyamaṁgaḻaddhyānaṁ

१ देवदेव! महादेव! सच्चिदानन्दविग्रह!

पञ्चकृत्यपरेशान! परमानन्ददायक!

1 devadeva mahādeva saccidānandavigraha
pañcakṛtyapareśāna paramānandadāyaka

२ श्रीराजराजेशी या श्रीत्रिपुरसुन्दरी

परापरमयी विद्या परमानन्दरूपिणी।

2 śrīrājarājeśī yā śrītripurasundarī
parāparamayī vidyā paramānandarūpiṇī ।

३ तस्या ध्यानञ्च मन्त्रञ्च पूजां पूजकलक्षणम्

इदानीं श्रोतुमिच्छामी श्रुतानि बहुशः पुरा।

3 tasyā dhyānañca mantrañca pūjāṁ pūjakalakṣaṇam
idānīṁ śrotumicchāmī śrutāni bahuśaḥ purā ।

४ मन्त्राणि कोटिसंख्यातान्यनेकानि च विस्तराऌ

मन्त्राणि दुर्व्विज्ञेयानि को वा वेत्ति समासतः।

4 mantrāṇi koṭisaṁkhyātānyanekāni ca vistarāl
mantrāṇi durvvijñeyāni ko vā vetti samāsataḥ ।

५ सर्व्वमन्त्रेष्ठ यत्सारं सर्व्वतन्त्रेष्वपि प्रभो

ब्रह्मविष्णुमहेशाद्यैरध्यातं यच्च जप्यते।

5 sarvvamantreṣṭha yatsāraṁ sarvvatantreṣvapi prabho
brahmaviṣṇumaheśādyairaddhyātaṁ yacca japyate ।

ॐ

६ यल् पूज्यते सदा सिद्धैस्तद्वदस्व क्रमादिह

अवाच्यमपि यद्वाच्यम् यदि ते करुणामयि

लक्षवारसहस्राणि वादितापि पुनः पुनः।

6 yal pūjyate sadā siddhaistadvadasva kramādiha
avācyamapi yadvācyam yadi te karuṇāmayi
lakṣavārasahasrāṇi vāditāpi punaḥ punaḥ ।

श्रीशिवः-

७ स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि

षोडशाक्षरविद्याया न्यासस्सार्व्वर्त्थसाधकः।

śrīśivaḥ-
7 strīsvabhāvānmahādevi punastvaṁ paripṛcchasi
ṣoḍaśākṣaravidyāyā nyāsassārvvartthasādhakaḥ ।

८ क्षयरोगादिमृत्युघ्नं सर्व्वसौभाग्यवर्द्धनम्

इतः पूर्व्वं मयानोक्तं गोप्याल् गोप्यतरं शिवे।

8 kṣayarogādimṛtyughnaṁ sarvvasaubhāgyavarddhanam
itaḥ pūrvvaṁ mayānoktaṁ gopyāl gopyataraṁ śive ।

९ श्रिराजराजराजेशीद्धानं सर्व्वोत्तमोत्तं

येनाहमपि युद्धेष्ठ देवासुरजयी सदा।

9 śrirājarājarājeśīddhyānaṁ sarvvottamottaṁ
yenāhamapi yuddheṣṭha devāsurajayī sadā ।

१० निगमागमकोटीनां सारात्सारतरं परं

तव स्नेहाल् प्रवक्ष्यामि भोगमोक्षप्रदं नृणां।

10 nigamāgamakoṭīnāṁ sārātsārataraṁ paraṁ
tava snehāl pravakṣyāmi bhogamokṣapradaṁ nṛṇāṁ ।

ॐ

११ यल्ज्ञानाल् जननीगर्भे न पुनर्ज्जायते पुमान्

अनेककोटि ब्रह्माण्डकोटीनां बहिरूर्द्ध्वतः।

11 yaljñānāl jananīgarbhe na punarjjāyate pumān
anekakoṭi brahmāṇḍakoṭīnāṁ bahirūrddhvataḥ ।

१२ सहस्रकोटि विस्तीर्ण्णे सुधासिन्धोस्तु मद्ध्यमे

रत्नद्विपजगद्दीपे शतकोटि प्रविस्तरे।

12 sahasrakoṭi vistīrṇṇe sudhāsindhostu maddhyame
ratnadvipajagaddīpe śatakoṭi pravistare ।

१३ पञ्चविंशति तत्वात्म पञ्चविंशति वप्रकैः

नवरत्नमयैस्तप्तहाटकालंकृतैः शुभै।

13 pañcaviṁśati tatvātma pañcaviṁśati vaprakaiḥ
navaratnamayaistaptahāṭakālaṁkṛtaiḥ śubhai ।

१४ अनेककोटि विततैर्म्मणिकुट्टिममण्डितैः

जातीचम्पकपुन्नागकेतकीबकुळादिभिः।

14 anekakoṭi vitatairmmaṇikuṭṭimamaṇḍitaiḥ
jātīcampakapunnāgaketakībakuḻādibhiḥ ।

१५ बिल्वैश्च सहकारैश्च हल्लहैश्च कदंबकैः।

15 bilvaiśca sahakāraiśca hallahaiśca kadaṁbakaiḥ ।

१६ सर्व्वर्त्तुकुसुमैः सर्व्वावाञ्चितार्त्थफलप्रदैः

वसन्तमन्मथानेकरक्षितैः पक्षिसङ्कुलैः।

16 sarvvarttukusumaiḥ sarvvāvāñcitārtthaphalapradaiḥ
vasantamanmathānekarakṣitaiḥ pakṣisaṅkulaiḥ ।

ॐ

१७ नदीनदसहस्रैश्च सुधाधिकरसोत्तरैः

स्वर्न्न स्वर्न्न दाशतसाहस्रैः कूलोद्यल्कल्पादपैः।

17 nadīnadasahasraiśca sudhādhikarasottaraiḥ
svarnna svarnna dāśatasāhasraiḥ kūlodyalkalpāadapaiḥ |

१८ स्वर्ण्णसारसहंसाळिलसल्सौवर्ण्णपङ्कजैः

अन्यैश्च विविधैः पक्षिलक्षैःपूर्ण्णैःसलक्षणैः।

18 svarṇṇasārasahaṁsāḻilasalsauvarṇṇapaṅkajaiḥ
anyaiśca vividhaiḥ pakṣilakṣaiḥpūrṇṇaiḥsalakṣaṇaiḥ |

१९ शतयोजनमुन्नम्रैर्गोपुराट्टाळ्म्मण्डपैः

रविकोटिसमप्रख्यैश्शोभितैर्म्मणितोरण्णैः।

19 śatayojanamunnamrairġopurāṭṭāḻmmaṇḍapaiḥ
ravikoṭisamaprakhyaiśśobhitairmmaṇitoraṇṇaiḥ |

२० त्रिलक्षयोजनायामचिन्तामणिगृहाङ्कणे

नवशक्तिलसद्रत्नपीठे तत्वमये शुभे।

20 trilakṣayojanāyāmacintāmaṇigṛhāṅkaṇe
navaśaktilasadratnapīṭhe tatvamaye śubhe |

२१ शतयोजनविस्तारे श्रीचक्रान्तस्त्रीकोणगे

चतुःपीठान्तरे बिन्दौ चन्द्रसूर्याग्नि मण्डले।

21 śatayojanavistāre śrīcakrāntastrīkoṇage
catuḥpīṭhāntare bindau candrasūryāgni maṇḍale |

२२ महामायायविनकामहिते सुमहोत्तरे

पञ्चब्रह्मात्मकेमञ्चे सर्व्वतत्वमयांबुजे।

22 mahāmāyāyavinakāmahite sumahottare
pañcabrahmātmakemañce sarvvatatvamayāṁbuje |

ॐ

२३ सषडाननषळ्कोणे चतुराननगर्भिते

चतुःपीठान्तष्टित्रम् शत्तत्वोद्यद्धं सतूळिके।

23 saṣaḍānanaṣaḻkoṇe caturānanagarbhite
catuḥpīṭhāntaṣṭitram śattatvodyaddhaṁ satūḻike।

२४ सर्व्वविद्यासनेसर्व्वतेजोमयशुभास्तरे

कोटिकन्दर्प्पलावण्यशिववामाङ्कवासिनीं।

24 sarvvavidyāsanesarvvatejomayaśubhāstare
koṭikandarppalāvaṇyaśivavāmāṅkavāsinīṁ।

२५ एककालोदितानेककोटिकोट्यर्क्कपाटलां

जपाकुसुमशङ्काशामजपामजपात्मिकां।

25 ekakāloditānekakoṭikoṭyarkkapāṭalāṁ
japākusumaśaṅkāśāmajapāmajapātmikāṁ।

२६ प्रभापाटलितानेककोटि ब्रह्माण्डमण्डलां

डाडिमीकुसुमाकारां कुङ्कुमारुणविग्रहां।

26 prabhāpāṭalitānekakoṭi brahmāṇḍamaṇḍalāṁ
ḍāḍimīkusumākārāṁ kuṅkumāruṇavigrahāṁ।

२७ बालार्क्ककोटिप्रभां त्र्यक्षां बालेनुमकुटोज्वलां

अचञ्चलतटिल्कोटिप्रभां पिम्गळवाससं।

27 bālārkkakoṭiprabhāṁ tryakṣāṁ bālenumakuṭojvalāṁ
acañcalataṭilkoṭiprabhāṁ pimgaḻavāsasaṁ।

२८ समावृत्तसुवृत्तोरुजघनस्थलमण्डलां

कोटीरकोटिघटितसुधाकरकराप्लुतां।

28 samāvṛttasuvṛttorujaghanasthalamaṇḍalāṁ

ॐ

koṭīrakoṭighaṭitasudhākarakarāpḻutāṁ ।

२९ फालभूतिलकीभूतलोचनां कामलोचनां

कटाक्षसरणीनर्यल्करुणापूर्ण्णवीक्षणां।

29 phālabhūtilakībhūtalocanāṁ kāmalocanāṁ
kaṭākṣasaraṇīnaryalkaruṇāpūrṇṇavīkṣaṇāṁ ।

३० सूर्येन्दुमण्डलाकारां मणिताटङ्कमण्डितां

शुक्राकारसमाकारनासाभरणभासुरां।

30 sūryendumaṇḍalākārāṁ maṇitāṭaṅkamaṇḍitāṁ
śukrākārasamākāranāsābharaṇabhāsurāṁ ।

३१ डाडिमीबीजसन्दोह सन्देहरत्नावळिं

वीणारवघृणादायनिजवाणीगुणोदयां।

31 ḍāḍimībījasandoha sandeharatnāvaḻiṁ
vīṇāravaghṛṇādāyanijavāṇīguṇodayāṁ ।

३२ कर्प्पूरवीटिकागन्धसुगन्धितदिगन्तरां

मणिदर्प्पणदर्प्पघ्नकपोलफलकप्रभां।

32 karppūravīṭikāgandhasugandhitadigantarāṁ
maṇidarppaṇadarppaghnakapolaphalakaprabhāṁ ।

३३ प्रसन्नवदनाम्भोजा समन्दहसितेक्षणं

मणिमंगळु सूत्रेण विलसल्कंबुकन्दरां।

33 prasannavadanāmbhojā samandahasitekṣaṇaṁ
maṇimaṁgaḻu sūtreṇa vilasalkaṁbukandarāṁ ।

३४ श्रितकल्पलतीभूतभुजवल्लीचतुष्टयां

रत्नांगुलीयनिवहोज्वलदंगुलिपल्लवां।

ॐ

34 śritakalpalatībhūtabhujavallīcatuṣṭayāṁ
ratnāṁgulīyanivahojvaladaṁgulipallavāṁ |

३५ तारहारत्सरीभास्वल्स्तनहाटकभूधरां

कुचभारनमन्मद्ध्यत्रिवळीलळितोदरां।
35 tārahāratsarībhāsvalstanahāṭakabhūdharāṁ
kucabhāranamanmaddhyatrivaḻīlaḻitodarāṁ |

३६ अनर्घरत्नखचितरशनाजघनस्थलां

सुवृत्तजंघोरुकाण्डां गूढगुल्फां गुडाळकाम्।
36 anargharatnakhacitaraśanājaghanasthalāṁ
suvṛttajaṁghorukāṇḍāṁ gūḍhagulphāṁ guḍāḻakām |

३७ शिञ्ज्ञानमणिमञ्जीरमञ्जुपादाब्जमञ्जुळाम्

रत्नग्रैवेयवलयमुकुटांगदकङ्कणाम्।
37 śijñānamaṇimañjīramañjupādābjamañjuḻām
ratnagraiveyavalayamukuṭāṁgadakaṅkaṇām |

३८ सुनिर्म्मलावृत्तनाभिरोमराजिविराजितां

कम्बुकन्ठीं सुनासाढ्याम् बिंबोष्तीमुडुपाननां।
38 sunirmmalāvṛttanābhiromarājivirājitāṁ
kambukanṭhīṁ sunāsāḍhyām biṁboṣṭīmuḍupānanāṁ |

३९ सर्व्वश्रृंगार वेषाढ्यां सर्व्वाभरण भासुरां

चन्दनागरुकस्तूरिमृगनाभिसुगन्धिनीं।
39 sarvvaśṛṁgāra veṣāḍhyāṁ sarvvābharaṇa bhāsurāṁ
candanāgarukastūrimṛganābhisugandhinīṁ |

४० कारणेशशिरोरत्ननिघृष्टचरणांबुजां

ॐ

पञ्चप्रेताम्सनारूढां पञ्चप्रवणवरूपिणीं।

40 kāraṇeśaśiroratnanighṛṣṭacaraṇāṁbujāṁ
pañcapretāmsanārūḍhāṁ pañcapravaṇavarūpiṇīṁ ।

४१ सृष्टिस्थित्यपसंहारतिरोधानानुग्रहोद्यतां

षोढ्यन्यासमहाभूषां षोडशार्ण्णस्वरूपिणीं।

41 sṛṣṭisthityapasaṁhāratirodhānānugrahodyatāṁ
ṣoḍhyanyāsamahābhūṣāṁ ṣoḍaśārṇṇasvarūpiṇīṁ ।

४२ इच्छाज्ञानक्रियानन्दचिल्पञ्चकविलासिनीं

प्रपञ्चादिजगन्मूर्त्तीं मन्त्रदैवत मातृकां।

42 icchājñānakriyānandacilpañcakavilāsinīṁ
prapañcādijaganmūrttīṁ mantradaivata mātṛkāṁ ।

४३ सप्तकोटिमहामन्त्ररूपिणीं चित्स्वरूपिणीं

शाडद्धसौधश्रृंगारविहारणसुपेशलां।

43 saptakoṭimahāmantrarūpiṇīṁ citsvarūpiṇīṁ
śaḍaddhvasaudhaśṛṁgāravihāraṇasupeśalāṁ ।

४४ षड्विधैक्यानुसन्धानपरचिद्वाम्नि संस्थितां

षडंभोरुहचक्रान्तस्फूर्ज्जतौदामिनीप्रभां।

44 ṣaḍvidhaikyānusandhānaparacidvāmni saṁsthitāṁ
ṣaḍaṁbhoruhacakrāntasphūrjjataudāminīprabhāṁ ।

४५ षड्वक्त्रगजवक्त्राभ्यांपार्श्वयोरुपशोभितां

अणिमाद्यावृतामाद्यामणिदाद्यष्टसिद्धिदां।

45 ṣaḍvaktragajavaktrābhyāṁpāarśvayorupaśobhitāṁ
aṇimādyāvṛtāmādyāmaṇidādyaṣṭasiddhidāṁ ।

ॐ

४६ सकृल् स्मरणमात्रेणविरिञ्चादिप्रदां

कल्याणगुणसम्पन्नां नित्यकल्याणदायिनीं।

46 sakṛl smaraṇamātreṇaviriñcādipradāṁ
kalyāṇaguṇasampannāṁ nityakalyāṇadāyinīṁ |

४७ सर्व्वमंगळदां देवीं सर्व्वमंगल विग्रहां

अनेकजन्मसंसिद्धसुकृताराद्ध्यपादुकां।

47 sarvvamaṁgaḻadāṁ devīṁ sarvvamaṁgala vigrahāṁ
anekajanmasaṁsiddhasukṛtārāddhyapādukāṁ |

४८ सर्व्वलोकैकजननीं सर्व्वलोकैकनायिकां

सचामराभ्यां श्रीवाग्भ्याम् पार्श्वयोरुपजीवितां।

48 sarvvalokaikajananīṁ sarvvalokaikanāyikāṁ
sacāmarābhyāṁ śrīvāgbhyām pārśvayorupajīvitāṁ |

४९ मन्त्रिणीदण्डिनीनीतिविधानाकर्ण्णनोत्सुकां

कळाचीवीटिकाच्छत्रभृम्गारादर्शपातुकां।

49 mantriṇīdaṇḍinīnītividhānākarṇṇanotsukāṁ
kaḻācīvīṭikācchatrabhṛmgārādarśapātukāṁ |

५० मणिवीणां शुकं शारीं ताळवृन्तं कमण्डलुं

पानपत्रं स्वर्ण्णवेत्रं पूर्ण्णस्वर्ण्णघटद्वयं।

50 maṇivīṇāṁ śukaṁ śārīṁ tāḻavṛntaṁ kamaṇḍaluṁ
pānapatraṁ svarṇṇavetraṁ pūrṇṇasvarṇṇaghaṭadvayaṁ |

५१ जयकाहळिकाभेरीशंखदुन्दुभिमद्दळान्

दिव्यानि धूपपात्राणि तथ सौवर्ण्णदीपिकाः।

51 jayakāhaḻikābherīśaṁkhadundubhimaddaḻān
divyāni dhūpapātrāṇi tatha sauvarṇṇadīpikāḥ |

ॐ

५२ बिद्रतीभिश्च बालान्नपूर्ण्णताराभिरावृतां

गायत्र्या चैव सावित्र्या सिद्धलक्ष्म्यादिशक्तिभिः।

52 bidratībhiśca bālānnapūrṇṇatārābhirāvṛtāṁ
gāyatryā caiva sāvitryā siddhalakṣmyādiśaktibhiḥ |

५३ वाग्वादिन्या नकुल्या च तुरंगारूढयावृतां

सम्पल्कर्या च साम्राज्यलक्ष्म्या च कुरुकुल्यया।

53 vāgvādinyā nakulyā ca turaṁgārūḍhayāvṛtāṁ
sampalkaryā ca sāmrājyalakṣmyā ca kurukulyayā |

५४ पत्मवत्या रेणुकया भीमवत्या च दुर्ग्गया

नीलकर्ण्ण्या महाकाळ्या भद्रकाळ्या च भद्रया।

54 patmavatyā reṇukayā bhīmavatyā ca durggayā
nīlakarṇṇyā mahākāḻyā bhadrakāḻyā ca bhadrayā |

५५ गंगाद्याभिस्सरिल्भिश्च मातृभिश्च सुसेविताम्

महाषोढोदिताशेषदेवतागणसेवितां।

55 gaṁgādyābhissarilbhiśca mātṛbhiśca susevitām
mahāṣoḍhoditāśeṣadevatāgaṇasevitāṁ |

५६ गणेशग्रहनक्षत्रयोगिनी राशिरूपिणीं

पञ्चाशल् पीतमध्यस्थाम् पञ्चाशद्वण्णरूपिणीं।

56 gaṇeśagrahanakṣatrayoginī rāśirūpiṇīṁ
pañcāśal pītamaddhyasthām pañcāśadvaṇṇarūpiṇīṁ |

५७ नवचक्रात्मिकां देवीं नवचक्राधिदेवतां

नित्यानन्दमयिं नित्यां नित्यषोडशिकान्वितां।

57 navacakrātmikāṁ devīṁ navacakrādhidevatāṁ

nityānandamayiṁ nityāṁ nityaṣoḍaśikānvitāṁ ।

५८ ओड्याणपीठनिलयाम् गुरुमण्डलमण्डिताम्

अनेकयोगिनी वृन्दै रणिमाद्यैर्म्महोज्ज्वलैः।

58 oḍyāṇapīṭhanilayām gurumaṇḍalamaṇḍitām
anekayoginī vṛndai raṇimādyairmmahojjvalaiḥ ।

५९ कोटिकोटि प्रभेदैश्चबालार्क्कद्वतिसन्निभैः

चतुस्समयदेवीभी षस्विधैर्योगिनीगणै।

59 koṭikoṭi prabhedaiścabālārkkadvatisannibhaiḥ
catussamayadevībhī ṣasvidhairyoginīgaṇai ।

६० षड्दर्शनाधि देवैश्च षडाम्नयाधि देवतै

चतुरायतनोत्भासि गणेशार्क्क हरीश्वरैः।

60 ṣaḍdarśanādhi devaiśca ṣaḍāmnayādhi devatai
caturāyatanotbhāsi gaṇeśārkka harīśvaraiḥ ।

६१ नवावरण देवीभिर्न्नवधा योगिनीगणैः

सेवितामरुणानेककोटिकोट्यर्क्कपाटलाम्।

61 navāvaraṇa devībhirnnavadhā yoginīgaṇaiḥ
sevitāmaruṇānekakoṭikoṭyarkkapāṭalām ।

६२ अनेककोटिभिश्चैव बालार्क्कायुतसन्निभैः

ब्रह्माणीकोटिसहितैर्ब्रह्मकोटिभिरावृतम्।

62 anekakoṭibhiścaiva bālārkkāyutasannibhaiḥ
brahmāṇīkoṭisahitairbrahmakoṭibhirāvṛtam ।

६३ नामपरायणोद्युक्तैर्ल्लक्ष्मीनारायणैःस्तुताम्

ज्वलन्मन्युभिरत्युग्रैः शतरुद्रीयसंज्ञितैः।

ॐ

63 nāmaparāyaṇodyuktairllakṣmīnārāyaṇaiḥstutām
jvalanmanyubhiratyugraiḥ śatarudrīyasaṁjñitaiḥ |

६४ रुद्राणीकोटिसहितै रुद्रकोटिभिरावृतां

अनेकाघोरशरभैर्बडवानलभैरवैः।

64 rudrāṇīkoṭisahitai rudrakoṭibhirāvṛtāṁ
anekāghoraśarabhairbaḍavānalabhairavaiḥ |

६५ दुर्ग्गाभिः काळिकाभिश्च महाकाळ्यैश्च संवृताम्

गणपैर्व्वीरभद्रैश्चवटुकैः क्षेत्रपालकैः।

65 durggābhiḥ kāḻikābhiśca mahākāḻyaiśca saṁvṛtām
gaṇapairvvīrabhadraiścavaṭukaiḥ kṣetrapālakaiḥ |

६६ सुकुमारैःकुमारैश्च तथा हरिहरात्मजैः

अनेककोटिदिख़्पालैश्चान्द्रार्ख़वसुकोटिभिः।

66 sukumāraiḥkumāraiśca tathā hariharātmajaiḥ
anekakoṭidikhpālaiścāndrārkhavasukoṭibhiḥ |

६७ सनकादैश्च योगीन्द्रैःसप्तर्षीणाञ्चकोटिभिः

नारदादिसुरर्षीणाम् कोटिभिः परिसेवितां।

67 sanakādaiśca yogīndraiḥsaptarṣīṇāñcakoṭibhiḥ
nāradādisurarṣīṇām koṭibhiḥ parisevitāṁ |

६८ अप्सरोयक्षगन्धर्व्वकिन्नराणाञ्चकोटिभिः

कोटिभिर्ग्गुह्यकानाञ्च सविद्याधर कोटिभिः।

68 apsaroyakṣagandharvvakinnarāṇāñcakoṭibhiḥ
koṭibhirgguhyakānāñca savidyādhara koṭibhiḥ |

६९ शंखपत्मनिधीनाञ्च कोटिभिः परिसेवितां

ॐ

भैरवीभैरवानेककोटि कोटिभिरावृतां।

69 śaṁkhapatmanidhīnāñca koṭibhiḥ parisevitāṁ
bhairavībhairavānekakoṭi koṭibhirāvṛtāṁ |

७० सुरासुराणां कोटीनां कोटिभिः परिसेविताम्

सर्व्वमन्त्रमयीं देवीं सच्चिदानन्दरूपिणीं।

70 surāsurāṇāṁ koṭīnāṁ koṭibhiḥ parisevitām
sarvvamantramayīṁ devīṁ saccidānandarūpiṇīṁ |

७१ इच्छाज्ञानक्रियारूपामिच्छकलितविग्रहां

परादिवैखरीरूपां महामायां परात्परां।

71 icchājñānakriyārūpāmicchakalitavigrahāṁ
parādivaikharīrūpāṁ mahāmāyāṁ parālparāṁ |

७२ महालक्ष्मीं महादेवीं महात्रिपुरसुन्दरीं

जगदाह्लादजननीं जगत्सङ्कल्पविग्रहां।

72 mahālakṣmīṁ mahādevīṁ mahātripurasundarīṁ
jagadāhl̤ādajananīṁ jagatsaṅkalpavigrahāṁ |

७३ जगदुज्जीवनोद्युक्तां जगद्रन्ज्जनकारिणीं

राजराजेश्वराङ्कस्थां राजराजेश्वरीं।

73 jagadujjīvanodyuktāṁ jagadranjjanakāriṇīṁ
rājarājeśvarāṅkasthāṁ rājarājeśvarīṁ |

७४ एवम् ध्यायेल् पराशक्तीं हृदिश्रीचक्ररूपके

पूर्ओक्तन्यासशुद्धात्मा सात्माभेदेन भावयेल्।

74 evam dhyāyel parāśaktīṁ hṛdiśrīcakrarūpake
pūroktanyāsaśuddhātmā sātmābhedena bhāvayel |

ॐ

७५ अन्तर्याग्रक्रमेणैव सिद्धदैवसमन्वितः

रक्तांबरस्रगालेपो रक्तभूषणभूषितः।

75 antaryāgrakrameṇaiva siddhadaivasamanvitaḥ
raktāṁbarasragālepo raktabhūṣaṇabhūṣitaḥ ।

७६ लक्षारुणुहे स्थित्वा पूजां कुर्याल् समाहितः

आवाहनादिभेदैश्च दशमुद्राःप्रदर्शयेल्।

76 lakṣāruṇugr̆he sthitvā pūjāṁ kuryāl samāhitaḥ
āvāhanādibhedaiśca daśamudrāḥpradarśayel ।

७७ सौभाग्यदण्डिनीमुद्रां रिपुजिह्वाग्रयन्त्रिणीं

शक्तिसञ्चलनं कुर्यन्मुखवेष्टेनमाचरेल्।

77 saubhāgyadaṇḍinīmudrāṁ ripujihvāgrayantriṇīṁ
śaktisañcalanaṁ kuryanmukhaveṣṭenamācarel ।

७८ यथाशक्तिजपेद्विद्वान् श्रीविद्यां सर्व्वसिद्धिदां

शाक्तञ्चतिलकं कुर्याल् शक्तिलक्षणचिह्नितं।

78 yathāśaktijapedvidvān śrīvidyāṁ sarvvasiddhidāṁ
śāktañcatilakaṁ kuryāl śaktilakṣaṇacihnitaṁ ।

७९ पुनःसौवर्ण्णयाचैव गळोर्द्ध्वं विन्यसेल्बुधः

व्यापकान्ते योनिमुद्रां मुखेक्षिप्त्वाभिवादयेल्।

79 punaḥsauvarṇṇayācaiva gaḻorddhvaṁ vinyaselbudhaḥ
vyāpakānte yonimudrāṁ mukhekṣiptvābhivādayel ।

८० संहारञ्चततः सृष्टिं स्थितिन्यासं समाचरेल्

ऋष्यादिकन्यासजालं षडंगन्यासमाचरेल्।

80 saṁhārañcatataḥ sr̥ṣṭiṁ sthitinyāsaṁ samācarel
r̥ṣyādikanyāsajālaṁ ṣaḍaṁganyāsasamācarel ।

ॐ

८१ ब्रह्मरन्ध्रै न्यसेल् पूर्व्वम् मणिबन्धद्वये तथा

ललटेनामिकां कृत्वा त्रैलोक्यस्याप्यहम् प्रभुः।

81 brahmarandhrai nyasel pūrvvam maṇibandhadvaye tathā
lalaṭenāmikāṁ kṛtvā trailokyasyāpyaham prabhuḥ ।

८२ गुरुपदिष्टमार्ग़ेण प्राणायामं समाचरेल्

क्रमपूजापरो मन्त्री श्रीचक्रार्च्चनपूर्व्वकं।

82 gurupadiṣṭamārġeṇa prāṇāyāmaṁ samācarel
kramapūjāparo mantrī śrīcakrārccanapūrvvakaṁ ।

८३ बिन्दुबिन्दुद्वयारूढम् हार्द्धयोनि स्वरूपकं

महाकामकलारूपमात्मानां भावयेत्सुधीः।

83 bindubindudvayārūḍham hārddhayoni svarūpakaṁ
mahākāmakalārūpamātmānāṁ bhāvayetsudhīḥ ।

८४ संपूर्णाञ्चिन्तयेद्विद्वान् ब्रह्मरन्ध्रैरुणप्रभां

द्रवल् सुताषोडशार्ण्णां सर्वसौभाग्यदांस्मरेल्।

84 saṁpūrṇṇāñcintayedvidvān brahmarandhrairuṇaprabhāṁ
draval sutāṣoḍaśārṇṇāṁ sarvasaubhāgyadāṁsmarel ।

८५ षोडशार्ण्णमहामन्त्रं मन्त्रराजोत्तमोत्तमं

सकृल् स्मरणमात्रेण कोटिजन्माघनाशनं।

85 ṣoḍaśārṇṇamahāmantraṁ mantrarājottamottamaṁ
sakṛl smaraṇamātreṇa koṭijanmāghanāśanaṁ ।

८६ महापातककोटीनां मञ्जनम् स्मृतिमात्रः

उपवातकदौर्भाग्यशमनं भुक्तिमुक्तिदं।

86 mahāpātakakoṭīnāṁ mañjanam smṛtimātraḥ

ॐ

upavātakadaurbhāgyaśamanaṁ bhuktimuktidaṁ ।

८७ विषरोगादिदारिद्र्यमृत्युसंहारकारकं

सप्तकोटिमहामन्त्रपारायणफलप्रदं।

87 viṣarogādidāridryamṛtyusaṁhārakārakaṁ
saptakoṭimahāmantrapārāyaṇaphalapradaṁ ।

८८ चतुःसमुद्रपर्यन्तभूदानफलदं शिवे

सहस्रकोटिगोदानफलदं स्मृतिमात्रतः।

88 catuḥsamudraparyantabhūdānaophaladaṁ śive
sahasrakoṭigodānaphaladaṁ smṛtimātrataḥ ।

८९ कोट्यश्वमेधफलदं जरामृत्यु निवारणं

किं पुनर्बहुनोक्तेन शिवसायूज्यदायकं।

89 koṭyaśvamedhaphaladaṁ jarāmṛtyu nivāraṇaṁ
kiṁ punarbahunoktena śivasāyūjyadāyakaṁ ।

९० घूटिका पादुका सिर्द्धि खेचरत्वादिदायकं

ब्रह्मविष्णुमहेशाद्यैर्ज्जप्यं तल्पदसिद्धये।

90 ghūṭikā pādukā sirddhi khecaratvādidāyakaṁ
brahmaviṣṇumaheśādyairjjapyaṁ talpadasiddhaye ।

९१ तद्रूपाद्देशिकाल्लब्धं षोडशारण्णं महामनुं

सहस्रं प्रजपेद्विद्वान् त्रिशतं शतमेव वा।

91 tadrūpāddeśikāllabdhaṁ ṣoḍaśāraṇṇaṁ mahāmanuṁ
sahasraṁ prajapedvidvān triśataṁ śatameva vā ।

९२ स जीवन्मुक्तः एवस्यात्सर्वसौभाग्यसुन्दरः

चतुःषष्टिकलापूर्णह्रदयः सदयोदय।

ॐ

92 sa jīvanmuktaḥ evasyātsarvasaubhāgyasundaraḥ
catuḥṣaṣṭikalāpūrṇṇahṛdayaḥ sadayodaya ।

९३ श्रीगुरोः पादुका मूर्द्धिनि श्रीचक्रं हृदिदेवता

श्रीविद्या यस्य जिह्वाग्रे स साक्षाल् परमः शिवः।

93 śrīguroḥ pādukā mūrddhini śrīcakraṁ hṛdidevatā
śrīvidyā yasya jihvāgre sa sākṣāl paramaḥ śivaḥ ।

९४ सहस्रारसुध अक्षिप्तषडंबुरुहमण्डलः

आचन्द्रतारकस्थायिनिजवं शयशोज्वलः।

94 sahasrārasudha akṣiptaṣaḍaṁburuhamaṇḍalaḥ
ācandratārakasthāyinijavaṁ śayaśojvalaḥ ।

९५ श्रीचक्रदेवी श्रीनाथस्वात्मनामाक्यैमादिशेल्

त्रैलोक्यमरुणंध्यात्वा श्रीविद्यां योजपेत्सुदीः।

95 śrīcakradevī śrīnāthasvātmanāmākyaimādiśel
trailokyamaruṇaṁdhyātvā śrīvidyāṁ yojapetsudīḥ ।

९६ स योगी कृतकृत्यश्च चराचर गुरुर्भवेल्

सिद्धचारणगन्धर्वयक्षरक्षोगणैः स्तुतः।

96 sa yogī kṛtakṛtyaśca carācara gururbhavel
siddhacāraṇagandharvayakṣarakṣogaṇaiḥ stutaḥ ।

९७ समस्तभूतप्रेतादिकृत्याकृत्यविभञ्जनः

जंगमस्थावरोल्भूतविषविद्रावकेकाविदः।

97 samastabhūtapretādikṛtyākṛtyavibhañjanaḥ
jaṁgamasthāvarolbhūtaviṣavidrāvakekāvidaḥ ।

९८ दिव्यमंगळकल्याणगुणरत्नैरलंकृतः

ॐ

मृतसन्ज्जीवको योगी महात्भुतचरित्रभूः।

98 divyamaṁgaḻakalyāṇaguṇaratnairalaṁkṛtaḥ
mṛtasanjjīvako yogī mahātbhutacaritrabhūḥ।

९९ विचरल् सकलान् लोकान् निग्रहानुग्रहक्षमः

महालक्ष्मीमयो भूत्वा लक्ष्मी बृन्दैश्च सेवितः।

99 vicaral sakalān lokān nigrahānugrahakṣamaḥ
mahālakṣmīmayo bhūtvā lakṣmī bṛndaiśca sevitaḥ।

१०० भुञ्जानो विविधान् भोगान् मूर्त्तिवानिवन्मथः

चराचरगुरुर्योगी साक्षाच्छिव इवापरः।

100 bhujñāno vividhān bhogān mūrttivānivanmathaḥ
carācaragururyogī sākṣācchiva ivāparaḥ।

१०१ राजराजेश्वरीरूपो राजराजादिवन्दितः

कुलकोटिं समृद्धृत्य देवी सायूज्यमाप्नुयाल्।

101 rājarājeśvarīrūpo rājarājādivanditaḥ
kulakoṭiṁ samṛddhṛtya devī sāyūjyamāpnuyāl।

॥ इत्युमामहेश्वरसंवादे राजराजेश्वरीतन्त्रे मोक्षप्रदेदिव्य मंगळध्यानम् सम्पूर्णम्॥

।। ityumāmaheśvarasaṁvāde rājarājeśvarītantre mokṣapradedivya maṁgaḻaddhyānam sampūrṇṇam ।।

Please send any corrections/suggestion on this document to menonar@yahoo.com